CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.13

Coll. No. 204

Title Śrī Maryādānuvyākhyā

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 204 Subject: Purāṇa

Title: Śrīdharīya śrutivyākhyā.

Author: Raghunātha. Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 4.7 by 5.1" Extent: 32 Foll.

Language: Sanskrit. Script: Devanāgarī.

Remarks: incomplete. Ends abruptly.

॥श्रीगणेशाय नमः॥ ॥श्रीकृष्णाय नमः॥ बालानामुपकाराय श्रीध
रीयकृतिसूक्तिः॥ व्याख्या व्याख्यायते श्रीमद्रघुनाथेन काचन॥१॥ सन्त न२
मिति॥ मत्वेहेतुः॥ स्वतन्त्र इत्यादि॥ तत्रापि हेतुरप्रामाण्येति॥ अप्र
म४ माण्यकारणं च भ्रमप्रमादविप्रलिप्साकरणापाटवरूपदोषचतुष्टयदु
ष्टपुरुषबुद्धिप्रभवत्वं॥ तच्चाहित्ये च हेतुरपौरुषेयत्वमिहितिबोध्यं॥
त्रिधाहि शब्दस्य वृत्तिरिति॥ वृत्तिः प्रवृत्तिः बोधोत्पत्त्यनुकूलसंके
तार्थव्यापार इत्यर्थः॥ संज्ञासंज्ञिसंकेतेनेति॥ संज्ञा च संज्ञी च संज्ञा
संज्ञिनौ तयोः संकेतस्तेन॥ तत्र संज्ञा शब्दः संज्ञी चार्थः संकेतः शक्ति १
:सा चास्माच्छब्दादयमर्थो बोधव्य इतीश्वरेच्छा॥ तस्याश्च शब्दार्थयोर्नि

छा१

यानेष्टत्वात्संज्ञासंज्ञिसंकेतेनेत्युक्तं॥ सरूढेण निर्दिशं [illegible] वस्तुवाचकश
ब्दशब्दमुदाहरति॥ डित्थ इति॥ डित्थशब्दो हि संज्ञाशब्दः संकेतितस्य
कस्यचित्पिंडमात्रस्याभिधायकः॥ ननु जातिगुण[illegible]शब्दस्य
जातिरूढमुदाहरति॥ गौरिति॥ गोशब्दो हि गोत्वजातिविशिष्टस्य
गोपिंडस्याभिधायकः॥ गुणरूढमुदाहरति॥ शुक्ल इति॥ शुक्लशब्दः शुक्ल
गुणवाचकः॥ क्रियाया अपि गुणत्वमिति पक्षमाश्रित्य क्रियाशब्दः पृथग् नो
दाहृतः॥ तथा चोक्तमाचार्यपादैः वरभूषणे॥ कर्मापि गुणलक्षणयो
गादिति॥ एतच्चाग्रे व्यक्तीभविष्यति॥ लक्षणा च तेनैव संकेतेनेति॥ सं
ज्ञासंज्ञिसंकेतेनाभिहितो योगरूढादिरूपः शब्दः संज्ञा तया प्रवहजन्यौ

×डि१

प्र१

घादिरूपोऽर्थस्तत्र बाधात्तत्संबंधिनि तीरादौ यावृत्तिः सा लक्षणेत्यर्थः ॥
गौणीमुदाहरति ॥ गौणी चेति ॥ अभिहितोऽर्थः सिंहादिशब्दस्य सिंहादिरू-
पः तत्राभिहिताये असह्यकारित्वादयो गुणास्तद्युक्ते अन्यस्स सदृशे देवद-
त्ते या प्रवृत्तिः सा गौणी ॥ ननु गुणयोगात्सादृश्यं ॥ अभिधेयेति ॥ अभिधेया-
द्रूपेणाविनाभूतं अभिधेयाविनाभूतं तस्मिन्प्रवृत्तिर्वृत्तिः ॥ अभिधेयेन
मुख्यया वृत्त्या गंगादिशब्दस्य वाच्येनार्थेन गंगादिस्वरूपेणाविनाभूते सह-
भूते शक्यसंबंधिनि तीरादौ गंगादिशब्दस्य या प्रवृत्तिर्वृत्तिर्व्यापार इति या-
वत्सा लक्षणेष्यत इत्यर्थः ॥ प्रतीतिरिति पा[ठे] प्रतीयतेऽनयेति प्रतीतिर्वृ- २
त्तिरेव ॥ अभिधेयस्य वाच्यस्यार्थस्य गंगादिरूपस्य योऽविनाभूते तीरा-

दौ संबंधस्तस्य प्रतीतिः ॥ प्रतीयतेऽनयेति प्रतीतिः प्रत्यायनं सा लक्ष-
णेत्यर्थः ॥ अभिधेये सिंहादिरूपे लक्ष्यमाणा ये गुणाः असह्यकारित्वाद-
यस्तैर्योगात्संबंधात्सादृश्यादिति यावत् ॥ ननु क्व ॥ शक्तिलक्षणादर्थाद-
न्यैर्गत्यादिर्गम्यते गम्यते ॥ तेन माणवके वृत्तिः सादृश्याद्युपजायतेति ॥ एत-
त्त्रिविधेति ॥ रूढिलक्षणा॰ गौणी चेति वृत्तित्रयं त्रिविधवृत्तिस्तत्र रूढिः प्रति-
पादितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्योगेनोदाहरति ॥ पंकजमित्यादि
श्री३ पंकजं अपगवः पाचक इत्युदाहरणत्रयं रूढिवृत्तिमात्रप्रतिपादितप-
दार्थयोगेन ॥ लक्षणावृत्तिर्गौणीवृत्तिः प्रतिपादितपदार्थयोर्योगेन तु नी-
लरक्तो घटः सिंहोऽग्निर्माणवक इत्युदाहरणद्वयमादिपदेन गृहीतमिति

द्रष्टव्यं॥ तथा हि। पंकजनिकर्तृकमुपमानयेति हेतौ पंकशब्दउपपदे
जन्‌धातुः प्रकृतिस्तस्य जन्मनि संकेतः डः प्रत्ययस्तस्य तु कर्त्तरि संके
तः उभावेतौ प्रकृतिप्रत्ययौ संज्ञाशब्दौ॥ स्वरूपमात्रेण निर्देशात् व
स्तुवाचकत्वात् तथा च तयोः॥ सप्तम्यां जनेर्ड इत्यत्र तत्तदेकैकव्यक्त्यु
पस्थापकत्वात् तयोर्योगाभिधायिका चोपपदसमासोत्पन्ना विभक्तिः
॥ ततश्च संज्ञारूढिप्रतिपादितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्योगेनेद
मुदाहरणं॥ एवमुपगोरपत्यमिति प्रसंगे औपगवमानयेत्यत्र प्रकृति
रूपतया पशब्दोऽपि संज्ञाशब्दस्तथापि उपसामीप्ये गौर्यस्य तस्यैवमर्थक ३
स्य तस्यैकदेशो गोशब्दो जातिशब्दस्तु उपस्थापके प्राग्दीव्यतोऽण इत

धिकारसूत्रेऽर्थनिर्देशेन नानाविधानामपत्यानामण्प्रत्ययादुपस्थितेः॥ तयो
र्योगाभिधायिका तद्धितलक्षणा प्रातिपदिकादुत्पन्ना सुविभक्तिः॥ अतो
जातिरूढिप्रतिपादितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्योगेनेदमुदाह
रणं॥ तथा पाचककर्तारमानयेति प्रसंगे पाचकमानयेत्यत्र पचधातुण्वुलौ
रूपस्थितिस्तत्र विक्लित्तिक्रियालक्षणे गुणे पचेः संकेतः॥ विक्लित्तिनि
ष्पादककर्तृव्यापारलक्षणे गुणे ण्वुलः॥ अतो गुणरूढिप्रतिपादितप
दार्थयोर्योगेनेदं॥ यद्यपि ण्वुलौ च तौ कर्तृवाचकौ तथापि सकर्मकत्व
धातुसंनिधिकालव्यापारकर्तृवाचको ण्वुल् इति गुणशब्दः॥ ड
स्तु अकर्मकधातुसंनिधिकालाभिव्यापारकर्तृमात्रवाचक इति संज्ञाश

र्थं॥ जनिक्रियाहिस्वकर्तृविकारः॥ नतुपचेरिवस्वकर्तृव्यापारनिष्पादे
ति अनयोर्महान्विशेष इति॥ नीलादिशब्दानांद्रव्येलाक्षणिकत्वात्॥
घटविशेषणत्वेनचनीलरक्तपदार्थयोर्द्रव्यार्थकत्वात्कर्मधारय त्वत्र
स्तुपाचतयोर्योगस्यानिधानात्लक्षणावृत्तिप्रतिपादितपदार्थयोः
३ प्रकृतिप्रत्ययार्थयोर्योगेनोदाहरणं॥ तथापाककर्त्तारमानयेतिप्रसंगे
पाचकमानयेत्यत्रपचधातुण्वुलोरुपस्थितेस्तत्रविक्लित्तिक्रियालक्षणे
गुणेचपचेःसंकेतः॥ विक्लित्तिनिष्पादककर्तृव्यापारलक्षणेगुणेण्वुलः॥
अतोगुणवृत्तिप्रतिपादितपदार्थयोर्योगेनेदं॥ यद्यपिण्वुलोऽत्रनोकर्तृवाचकौ ५
तथापिसकर्मकपचधातुसंनिधिबलात्सव्यापारकर्तृवाचकोण्वुलइतित

स्यगुणशब्दत्वं॥ ण्वुलस्तु अकर्मकजनिसंनिधिबलान्निर्व्यापारकर्तृमा
त्रवाचकइतिसंज्ञाशब्दत्वं॥ जनिक्रियाहिस्वकर्तृविकारः॥ नतुपचेरि
वस्वकर्तृव्यापारनिष्पादेति अनयोर्महान्विशेष इति॥ नीलादिशब्दा
नांद्रव्येलाक्षणिकत्वात्॥ घटविशेषणत्वेनचनीलरक्तपदार्थयोर्द्रव्या
र्थकत्वात्कर्मधारय स्त्वत्रसुपाचतयोर्योगस्यानिधानात्लक्षणावृत्तिप्र
तिपादितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्योगेनोदाहरणं॥ नीलरक्तो
घट इति॥ तथामाणवकसामानाधिकरण्यात्सिंहाग्निशब्दाभ्यां
सिंहाग्निस्वरूपेलक्षितायेशूरत्वदाहकारित्वादयोगुणैस्तैः
हस्यात्गुणयुक्तेमाणवकेगौणशक्तेर्गौणोसमासोनतदेत्यलक्षितेविनत

वतयोर्योगिस्याभिधानाद्गुणवृत्तिप्रतिपादितपदार्थयोः प्रकृतिप्रत्यया
र्थयोर्योगेनेदं सिद्धं निर्माणक इत्युदाहरणं॥ अत्रोक्तप्रत्ययपदविशुद्धि
प्रत्ययश्च तदर्थश्च एकत्वविशिष्टः कर्त्रादिरूपो ब्राह्मणिकार्थसमर्पकत्वा
दुत्तरत्र गौण इति॥ केनचिदपि संबंधाभावादिति॥ लक्षणायाः शक्यसंबं
धविषयित्वात् योगवृत्तेः प्रकृतिप्रत्ययार्थयोर्योगविषयत्वात् योग
स्य च संबंधापरपर्यायत्वात्॥ न ते वृत्ती असंगे ब्रह्मणि प्रवर्त्तेत इत्यर्थः॥५॥
बुद्धीति॥ ननु असंगतमिदं वेदानां ब्रह्मपरत्वे आदिमो ईश्वरस्य बुद्ध्यादि
नीसर्जनेन समाधानमिति॥ तथाच लोकानामात्राणकः॥ अन्यदुक्तं अन्य ५
ज्ञानमित्याशंक्यान्त्रसूचितानां लक्षणैक्य निषेधोपासनात्मत्वपरत्वेन

तिरनुसंधेया॥ तत्तेजोऽसृजत॥ तदिति सत्॥ तेजोऽसृजत सृष्टवान्॥ सक
लकल्याणगुणनिलयमित्यस्योदाहरणमेतत्॥ कामनादीनां लोकोप
कारार्थत्वेन तादृशगुणानामभिव्यक्तेः॥ लोकाश्रयत्वकथनाद्वा॥ सत्यं ज्ञा
नमनंतं ब्रह्मेति॥ यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति॥ यत्तत्सत्यं ब्र
ह्मासत्यं विशेषणं असत्यतानिवृत्त्यर्थं॥ असत्यतानिवृत्त्यर्थं तेविकारनिवृ
त्तेस्तन्निवृत्त्या च कारणता प्राप्ता तया च कारहास्यकारकवस्तुत्वात्स्तद
चिद्रूपता प्राप्ता॥ तन्निवृत्त्यर्थं ज्ञानं ब्रह्मेति ज्ञानविशेषणं॥ ज्ञानं ज्ञप्तिरव
बोधस्तद्रूपं॥ नाचसाधनो ज्ञानमात्रस्यास्य ब्रह्मविशेषणत्वात् लौकि
कस्य ज्ञानस्यांतवत्त्वदर्शनात् प्राप्तं ज्ञानरूपस्य ब्रह्मणोऽप्येवमंतवत्वं तंनि

वृत्त्यर्थमनंतंब्रह्मेति अनंतविशेषणं॥ आदिपदाद्विज्ञानमानंदंब्रह्मेत्याद
योगृह्यंते॥ एतेनसच्चिदानंदत्वंस्पष्टमेवदर्शितं॥ अपरेतुसर्वंविंदतइ
तिनिरुक्त्यासर्वविदित्यनेनसर्वशक्तित्वं॥ यस्यज्ञानमयंतपइत्यस्यइच्छाप्र
धानमैश्वर्यमित्यर्थंज्ञात्वातेनसर्वेश्वरत्वंसर्वस्यवशीत्यस्यसर्वस्यनियंता
इत्यर्थः॥ सर्वस्येशानइत्यस्यसर्वोपास्यःसर्वकर्मफलदाताचेत्यर्थः॥ यः
पृथिव्यामित्यादिकंपृथिव्यंतर्यामिप्रतिपादिकंपूर्वत्रहेतुरित्येवव्याचख्युः
॥ शेषंसमानं॥ एवंलक्षणपराणांश्रुतीनांसगुणपरत्वंप्रदर्श्यऐक्यपरश्रुत्ये
कवाक्यतयातद्द्वारेणनिर्गुणपर्य्यवसानंदर्शयन्नैक्यपरश्रुतीनामपिसगु ६
णप्रतिपादनमुखेननिर्गुणपर्य्यवसानंदर्शयति॥ तथाभूतेत्यादिनाउप

पंचविधानांश्रुतीनांतुसत्यत्वंवदन्निर्गुणैकपरत्वमप्याह॥ अयमत्राभिप्रायः
॥ यद्यपितिसृणामपिश्रुतीनांमध्येतत्क्रतुन्यायेनकापिवृत्तिर्ब्रह्मणिनसंभ
वति॥ तथापिसर्वश्रुतीनांपरंपरादिनाब्रह्मपरत्वंघटतइत्ययमभिप्राय
इत्यस्यार्थः॥ सर्वज्ञइत्यादिनापूर्वोक्तमर्थंक्रमेणाह॥ यःसर्वज्ञइत्यादि
ना॥ यस्यज्ञानमयंज्ञानविकारएवसर्वज्ञातालक्षणंतपोनाम्नासल
क्षणइतिसर्वज्ञतोदाहरणं॥ सर्वस्यब्रह्मादेर्वशीसर्वोब्रह्मस्यवशोवर्तते॥
उक्तंच॥ एतस्यवाअक्षरस्यप्रशासनेगार्गिसूर्य्यचंद्रमसौविधृतौतिष्ठतः॥
अनेनसर्वशक्तिता॥ नकेवलंवशीकिंतुसर्वस्यईशानः॥ अनेनेशितासर्वे
श्वरताच॥ यःपृथिव्यांतिष्ठन्नभवति॥ सोंऽतर्यामी॥ सर्वतःपृथिव्यांतिष्ठती

वाक्येनहितानांद्रव्यस्यैवतासंबंधमात्रबोधकत्वमौत्सर्गिकत्वात्॥एवंका
रःपदद्वयस्यनहाच्यतारांकानिवृत्त्यर्थः॥[illegible]तायामात्र॥आमिक्षा
रूपस्यविषयविशेषस्यार्पणेसमर्पणीक्रियतेइत्यर्थः॥नहितोतस्यानुपयुक्ता
निधानशक्तेरेवप्रतिलक्षमाणस्योपपदेनविषयदानमात्रंक्रियते॥आमिक्षा
पदसंनिधिवशाद्वैश्वदेवीशब्दएववतामनिसंधत्तेइतिनिर्गलितोर्थः॥एते
नशब्दयोरेवात्रसामानाधिकरण्यंनार्थयोरितिज्ञेयं॥नचाजहत्स्वार्थयेति
॥अजहत्स्वार्थानीलपीतादिरूपोयस्यांतया॥निर्गतंरूढंप्रादुर्भा ९
वःप्रागभावोयस्याःसानिरूढानिरूढाचासौलक्षणाचेति॥मुख्यार्थ
त्यैवसत्यालक्षणावृत्त्यैवप्रतीयमानयेत्यर्थः॥यद्वा॥नितरांरूढानिरूढासा

चासौलक्षणाचतया॥अनादिपरंपरयागतयानसांप्रतंरचितयेत्यर्थः॥सा
मानाधिकरण्यमित्यनुषज्यते॥एवमग्रेपि॥स्वबुद्ध्येति॥स्वरूपसत्वमा
त्रेणनहिकिंचिद्विशेषणमितिवार्त्तिकस्यपूर्वार्द्धस्यार्थः॥स्वाकारेणवि
वस्तु शेष्यमनवच्छिन्नस्यकिंचित्किंचिदपिस्वरूपसत्वमात्रेणस्वच्छिन्नैवविशेषणं
नहिकिंतुयेननीलादिनास्वबुद्ध्यास्वाकारज्ञानेनविशेष्यंतत्प्रसादिरज्यतेऽ
वनास्यतेऽन्यस्माद्व्यावर्त्यतइत्यर्थः॥नहिशेषणमिति॥विरुद्धार्थत्वेति॥तत्वं
पदार्थयोरितिशेषः॥अयंनावः॥नीलगुणोत्पलद्रव्ययोर्गुणगुणिनोरवि
रुद्धस्वनावत्वेनविशेषणविशेष्यनावकल्पने[illegible]नावा[illegible]तत्राज
हत्स्वार्थानिरूढलक्षणा॥अत्रतुपरोक्षापरोक्षत्वादिविरुद्धार्थत्वेनविशेष

लविशिष्टत्वावकल्पनानुपपन्नो न निरूढलक्षणेति॥ तद्योगात्तस्या नि
रूढलक्षणाया अयोगाद्भावात्॥ न चेति॥ जहती स्वार्थौ येन जहत्स्वार्थे
तत्त्वंपदे तयोर्भावो जहत्स्वार्थत्वं तेन॥ एकार्थत्वस्येत्यत्रापि तत्त्वंपदयोरिति शेषः
॥ संबंधिलक्षणायां तु संबंधिनोः संबंधस्य च स्फुरणान्नैकार्थत्वमिति भावः
॥ अत्र इति॥ यतः प्रकारांतरेण सामानाधिकरण्यं न घटतेऽतः तदुपसंहारः
॥ जहती अजहती च स्वार्थौ येन तत्त्वंपदे यस्यां सा जहदजहत्स्वार्था सा चासौ
लक्षणा च तया॥ एकार्थस्य भाव ऐकार्थ्यं एकार्थवृत्तित्वमिति यावत् तेन तल्ल
क्षणेन सामानाधिकरण्येनेत्यर्थः॥ सोऽयं देवदत्त इत्यस्यायमर्थः॥ यथा कश्चि
त् कदाचित्काश्यां देवदत्तं पुनः कालांतरे काश्यामपश्यन्ति॥ देशकालवि

१४

प्रकर्षात्तमत्यभिज्ञातुमसमर्थः पूर्वं दृष्टादन्यं पश्चाद्दृष्टं मन्यते तमन्यः प्रत्य
भिज्ञाकुशलः प्रतिबोधयति सोऽयं देवदत्त इति॥ तत्र तच्छब्देन विप्रकृष्टदे
शकालविशिष्टोऽर्थोऽभिधीयते॥ इदंशब्देन सन्निकृष्टदेशकालविशि
ष्टः॥ तदुक्तं॥ इदमस्तु सन्निकृष्टं समीपवर्ति चैतदो रूपं॥ अदसस्तु विप्र
कृष्टं तदिति परोक्षे विजानीयादिति॥ न च सन्निकृष्टविप्रकृष्टयोरेकत्वं
संभवति तस्माद्विरोधिविशेषणतत्संबंधपरित्यागेन भागलक्षणया
सोऽयमिति पदद्वयं देवदत्तस्य स्वरूपमखंडितं प्रतिपादयति॥ तथा जी
वोऽपि परमार्थतो ब्रह्मैव सन्नविद्यादोषवशादसंसारिणो ब्रह्मणोऽन्यं
तमिति संसारिणमात्मानं मन्यते॥ तथा तं श्रुतिर्बोधयति॥ तत्त्व

मसीति॥ तत्र तत्पदेन प्रत्यक्त्वं परोक्षत्वञ्च निधीयते॥ प्रत्यक्त्वं एकमद्विती
यं इति तत् जगत्कारणं ब्रह्म॥ त्वंपदेनापि अविद्याद्युपाधिपरिच्छिन्नो
नित्यपरोक्षः प्रत्यगात्मा निधीयते॥ न च परोक्षापरोक्षापरिच्छिन्नादिकं
न्नापरिच्छिन्नयोरेकत्वं संभवति तस्मात् तत्पदार्थगतपरोक्षापरिच्छेदादिक
त्वंपदार्थगतं अपरोक्षपरिच्छेदादिकं परित्यज्य जहदजहल्लक्षणया
तत्त्वमिति पदद्वयं सच्चिदेकरसं अखंडं आत्मतत्त्वं प्रतिपादयति॥ अ
सिपदमपि प्रत्यक्त्वार्थस्य ततः प्रत्यक्पदार्थस्य च प्रतीचः संघट्टनेनानुवद
दाभ्यां संबध्यते॥ निषेधपरश्रुतीनां तत्परत्वमाह॥ अस्थूलादीति॥
साक्षादुपाधिनिषेधेनेति॥ साक्षाद्ब्रह्मणि पर्यवसानमित्यन्वयः॥ अस्थू १०

एतानामेव स्थूलत्वाद्युपाधीनामनुवादाद्विशिष्टसंबंधनत्वमस्त्येव॥ कुतः॥ उ
पाधिनिषेधवाक्यानां तत्र तदभावो विषयः अभावश्चाधिकरणात्मकः अधिक
रणं च सर्वत्र निर्विशेषं ब्रह्मैव॥ अतोऽस्थूलादिवाक्यानां साक्षान्निर्गुणे ब्रह्मणि
पर्यवसानमित्युक्तं॥ उपासनासृष्टिपरश्रुतीनां परैतत्परत्वमाह॥ उपास
नादित्यादिना॥ आदिग्रहणात्सृष्ट्यादिनि॥ अन्यार्थेति॥ अपवादार्थेत्यर्थः
॥ क्रियार्थेति पाठे यज्ञादिक्रियार्थेत्यर्थः॥ सृष्ट्याद्यवलंबनेनेति सृष्टिशब्देनै
व तदविनाभूतत्वात् स्थितिप्रलयावुपलक्षितौ॥ तत्रश्चादिशब्देनोहरसु
पासते इत्यादिना वक्ष्यमाणोदराद्यालंबनं सोपाधिविधिकमुपासनं गृह्य
ते॥ अत्रोपासनादिवाक्यानामित्यत्रादिपदेन सृष्ट्यादिवाक्यग्रहणस्य

ज्ञापनामात्रस्यशास्त्रादिग्रहणं॥ अवलंबनस्यनिरूपणमर्थः॥ तेनायमर्थः॥ शा
स्त्रादिवाक्यानामागमापायिसृष्टिस्थितिप्रलयनिरूपणेनयत्तज्ज्ञानसा
धनवैराग्यंविधानंतेनतद्वारेणतत्परत्वंब्रह्मणिपर्य्यवसानेमित्यर्थः॥ शा
स्त्रादिकर्तुरीश्वरस्यतुसाक्षाद्देवप्रतिपादनंनास्तिः॥ उपासनावाक्यैरु
दराद्युपाध्यालंबनसगुणब्रह्मनिरूपणेनांतःकरणशुद्धिलक्षणंयत्
ज्ञानसाधनविधानंतेनतासांतत्परत्वंनिर्गुणेब्रह्मणिपर्य्यवसानमिति
॥कर्मविधिवैसांपराणांश्रुतीनांविविदिषायांविनियोगादनुपादानं॥ अ नं
त्रायमभिप्रायइत्यत्रकासगुणमेवेत्यारभ्यसत्यंज्ञानमयंतंब्रह्मेत्याद्य ११
इत्यंतेनपूर्वार्द्धस्याभिप्रायोवर्णितः॥ तथाचतेश्वरस्वामिन्यादिनाउपसंहरिष्य

तीत्यंतेन अकल्पनायेत्यस्य॥ उपासनादित्यारभ्य तत्परत्वं इत्यंतेन मात्रार्थं चे
त्यादिच पस्येत्यारुह्णनीयं॥२॥ यथोक्तकालंबनेति॥ यथोक्तं विशिष्टं आलंब
नं यस्याः सा तथा॥ ब्रह्मपरेति॥ ब्रह्मपरं विषयो यस्याः सा तया॥३॥ अत्रेत्यस्मि
न् श्लोके गाथा संवादशब्दयोः सामानाधिकरण्यं नियतलिंगत्वात्॥ नाराय
णनारदयोः संवादशब्दरूपां गाथामित्यर्थः॥४॥५॥ नारतेति संबोधनं वा
चोऽर्थेऽवधानाय॥ नतु वर्षविशेषणं तस्यास्मिन्नित्यनेनैव संबद्धत्वात्॥
६॥७॥८॥९॥१०॥ केनापि कौतुकेन भ्रमणसुखानिदेकेणेत्यर्थः॥११॥
॥१२॥१३॥ जयजयेति॥ अहमेव प्रमाणमिति॥ निगमोऽनुचरैरिति मा १२
त्रस्यार्थीये॥ पूर्वं तं च गुह्यं वाच ब्रह्मणो लक्षणमित्युक्तं॥ तत्र किंत

लक्षणमित्याकांक्षायामाह वरुणः यतो वा इमानि भूतानि जायंत इति
येन जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्ब्रह्म विजिज्ञासस्वेति मं
त्रशेषः यतो यस्माद्धेतोः इमानि भूतानि ब्रह्मादिस्तंबपर्यंतानि जायंते
येन जातानि जीवंति प्राणान् धारयंति वर्द्धंते नाशकाले यत्प्रतीयंति
यद्ब्रह्म प्रतिगच्छंति अभिसंविशंति तादात्म्यमेव प्रतिपद्यंते उत्पत्तिस्थि
तिनाशकाले यदात्मेति. न जहति भूतानि नदेतद्ब्रह्मणो लक्षणं तद्ब्र
ह्म विजिज्ञासस्व विशेषेण ज्ञातुमिच्छस्वेति यः परमेश्वरो ब्रह्माणं सर्व
जीवसमष्टिरूपं हिरण्यगर्भं विदधाति अवांतरसर्गकर्तृत्वेन ससर्ज
पूर्वं सर्गादौ यः परमेश्वरो वै प्रसिद्धो वेदांश्च प्रहिणोति प्रपदे तस्मै प्रथ

महेश्वरएवगर्नीय तमेवन्नूनंपरमेश्वरंहएवार्थे तमेवदेवंद्योतमानंज्ञा
नस्वभावं आत्मबुद्धिप्रसादंस्वविषयबुद्धिंप्रकाशयतीति आत्मबुद्धि
प्रसादकरं मुमुक्षुर्वैवैप्रसिद्धौ मुमुक्षुत्वादधिकारसंपत्तिर्मेऽनु
नवसिद्धेति शरणमहंप्रपद्ये मुमुक्षुरहंमोक्षसिद्ध्यर्थंआश्रयंप्रा
प्तोस्मि इत्यनेनमज्जयाचरतइत्यस्योदाहरणं यइतिप्रातीकमेवोत्था
पितमिदं यआत्मनितिष्ठतीतिनभवतिसोन्तर्यामीत्यर्थः सत्यज्ञानमि
तिब्राह्मीहियेत्यत्रव्याख्यातं यआत्मनीत्यादिश्रुतीत्रयं आत्मना
चरतइत्यस्योदाहरणमिति १४ १ दहदिति ईक्षायामिति या २३
नीतियान्तस्य याप्रापणइत्यस्यरूपं अवसितस्येति अदपूर्वं

स्यषिंजबंधनेइत्यस्यरूपं अग्निरिति परापररूपेणावस्थितोऽग्निरस्या
भचिस्तूयते अग्निनयेनदर्शयति योयंमग्निरसौदिवोमूर्द्धा अहन्वना
दित्यात्मनाद्युलोकस्यमूर्द्धाभवतीति वाचारंभणंवागालंबनमितिया
वत्तविकारोनामानामैवनामधेयंस्वार्थेधेयट्प्रत्ययः वागालंबनमा
त्रंनामैवकेवलंनविकारोनामवस्त्वस्तिपरमार्थतोमृत्तिकेत्येवमृत्तिकै
वतुसत्यंवस्त्वस्तीतिदृष्टांतः परमकारणब्रह्ममात्रंतांकार्यस्यप्रपंचस्य
बोधयति सर्वंखल्विदंब्रह्मेति तज्जलानितिशांतउपासीतेतिश्रुति
शेषः सर्वंसमस्तंखल्वितिवाक्यालंकारार्थोनिपातः इदंजगत्नामरू
पविलतंप्रत्यक्षादिविषयंब्रह्मकारणं तद्वनमत्वात्ब्रह्म कथंसर्वस्य

ब्रह्मत्वमित्यत आह तज्जलानिति तस्माद्ब्रह्मणो जातं तज्जं तथा तस्मिन्नेव ब्र
ह्मणि लीयत इति तल्लं तथा तस्मिन्नेव ब्रह्मणि का[illegible] प्राणिति [illegible] इति त
दन् तज्जं च तल्लं च तदनं च तज्जलान् तृतीयशब्दनिर्दे[illegible]विशेष
णं इति एवं ब्रह्मात्मतया त्रिकालेषु अवशिष्टं न ह्यतिरिक्तेण ग्रहणात्
यस्मात्सर्वमिदं ब्रह्म अतः शान्तः रागादिरहितः सन् एतत्सर्वं ब्रह्म तद्
ब्रह्माणगुणैर्युक्तमुपासितेति २५।२ शृणु तस्य ममायोच्यमानस्य ब्रह्म
णो ज्ञानमाहात्म्यमिति उपकोशलं प्रति जाबालस्य वचनं यथा पुष्कर २७
पलाशे आपो न श्लिष्यन्ते एवमेव एवंविदि पापं कर्म न श्लिष्यत इत्यादि
पुष्करपलाशे पद्मपत्रे यथापो जलानि न श्लिष्यन्ते न लगन्ति एवमेव तथाहि

एवं यथावद्व्यापि ब्रह्म तथाविदित्वा पापं कर्म न श्लिष्यत इति तं महिमानं वि
दित्वेत्युक्तं तत्र किमित्याकांक्षायामाह न कर्मणा लिप्यते पापकेनेति न
लिप्यते न संबध्यते कर्मणा पापकेन एनं धर्माधर्मतत्त्वेन उभयमे
व पापकमेव विदुश्च इति साधनान्तरनिरपेक्षेण विरजां नदीं मनसै
वात्येति अतीत्य गच्छतीत्युक्तं तत्र शंकते ननु सुकृतमप्यस्ति माहात्म्ये
कथमस्य विरजोत्तार इत्यत आह न सुकृतं तद्दुष्कृते विधुनुत इति न
दा च शारीरपरित्यागावसरे उपास्यात्मासाक्षा[illegible] सुकृत
दुःकृते शरीरं हित्वा ब्रह्मलोकमभिसंभवा[illegible] पापे विधू[illegible] सुकृत
दुःकृतयोः परिपाके ज्ञानेन परित्यजतीत्यर्थः अश्व इव रोमाणि वि

धूयमेसततमहत्तनंशरीरंहित्वाब्रह्मलोकमभिसंयान्तीति पूर्वद्वैनविषये
नलिप्यतेतिकृतमश्चनेति नयतिमित्तंप्रतिषिद्धंलत्रुस्शंकते नन्वस्तिम
यनिमित्तेसाधुकरणपापक्रियाचतत्राह एतंहवावनतपति एतंहवावक्रमा
त्मविदंहवावशब्दौअवधारणार्थौ नतपतिनोद्वेजयतिनसंतापय
यति कथंनतपयतिइत्यपेक्षायामाह अहमेवकिंकस्मात्साधुशो
भनंकर्मनाकरवंनकृतवानस्मिकस्मात्प्रतिषिद्धंकर्माकरवमित्या
सन्नेमरणकालेनरकपातादिनयंभवतितेनएतंनतपतीयथाऽवि
द्वांसमितिस्वामिनांश्लोके सकलवेदगणैरितसद्गुणइत्येतावन्मू १५
लस्येतिशब्दस्यार्थः तवपदस्मरणेनगतक्रमाइत्यस्यचपदस्मर

णेनविशेषेणगतक्रमात्त्वंनीत्यर्थःकर्तव्यः मूलस्यकिमुतेत्यादेर्व्याख्या
नरूपस्यैत्याद्यस्य १६ ३ हनयइति असुर्यानामतेलोकाअंधेनत
मसावृताः तांस्तेप्रेत्याभिगच्छंतियेकेचात्महनोजनाइति परमात्मा
भावयद्वयमपेक्ष्यदेवादयोपिअसुरास्तेषांएतेअसुर्याः नामशब्दोऽ
नर्थकोनिपातः तेलोकाः कर्मफलानि अंधेनादर्शनात्मकेनतमसा
परमात्मनोऽज्ञानेनावृताः आच्छादिताः तांल्लोकान्स्थावरांता
न्प्रत्यन्त्यत्काममृत्यैत्येत्यर्थः अभिगच्छंतिप्राप्नुवंति येकेचात्महन
येकेचकेचन आत्मानंघ्नंतीति आत्महनः केतेऽविद्वांसः कथंते
आत्मानंघ्नंतीति अविद्यादोषेणविद्यमानात्मनोयत्कार्यफलंअजरा

मरत्वादिलक्षणंनतस्यतिरोभूतंनवनीतमिवाहतनाऽविद्वांसोऽज्ञना
येकेचात्ममहत्वेन इत्युच्यते तथा नचेदवेदीन्महतीविनष्टिरिति चे
द्यदिनेदीमहंब्रह्मेतिनविदितवानित्यर्थः तदात्महतीविनष्टिः स
म्यग्ज्ञानेविनानिवर्त्तयितुमशक्या जन्ममरणादिरूपासंसृतिरित्यर्थः अन्नम
यादीनित्यत्रादिशब्देनप्राणमयमनोमयविज्ञानमयानंदमयानांग्र
हणं सवाएषपुरुषोऽन्नरसमयस्तस्येदमेवशिरइत्यादिनेत्यत्रादिपदे
न अयंदक्षिणःपक्षः अयमुत्तरःपक्षः अयमात्मा इदंपुच्छंप्रतिष्ठा तस्मा
द्वाएतस्मादन्नरसमयादन्योऽन्तरआत्माप्राणमयस्तेनैषपूर्णःसवा १६
एषपुरुषविधस्तस्यपुरुषविधतामन्वयंपुरुषविधस्तस्यप्राणःशिरो

व्यानोदक्षिणःपक्षः अपानउत्तरपक्षः आकाशआत्मापृथिवीपुच्छंप्र
तिष्ठा तस्यैषशारीरआत्मायःपूर्वस्यतस्माद्वाएतस्मादन्योंतरआत्मा
मनोमयस्तेनैषपूर्णःसवाएषपुरुषविधस्तस्यपुरुषविधतामन्वयंपु
रुषविधस्तस्ययजुरेवशिरः ऋग्दक्षिणःपक्षःसामोत्तरःपक्षः आदेश
आत्मा अथर्वांगिरसःपुच्छंप्रतिष्ठा तस्यैषएवशारीरआत्मायःपूर्वस्यतस्मा
द्वाएतस्मान्मनोमयादन्योंतरआत्माविज्ञानमयस्तेनैषपूर्णःसवा
एषपुरुषविधस्तस्यपुरुषविधतामन्वयंपुरुषविधस्तस्यश्रद्धैवशिरः
ऋतंदक्षिणःपक्षः सत्यमुत्तरःपक्षः योगआत्मामहःपुच्छंप्रतिष्ठा तस्यै
षश्लोकोभवतिविज्ञानंयज्ञंतनुतेइत्यादि तस्यैषशारीरआत्मायःपू

वस्यतस्माद्वा एतस्माद्विज्ञानमयादन्योंतर आत्मा आनंदमयस्तेनैष पूर्णः
स वा एष पुरुषविध एव तस्य पुरुषविधतामन्वयं पुरुषविधः तस्य प्रियमेव शि
रः मोदो दक्षिणः पक्षः प्रमोद उत्तरः पक्षः आनंद आत्मा ब्रह्म पुच्छं प्रतिष्ठा
तस्यैष एव शारीर आत्मा यः पूर्वस्येत्यादि गृह्यते ब्रह्मविदाप्नोति पर
मिति अधिकृत्य तैत्तरीयकोपनिषदि इदमाम्नायते अन्नात्पुरुषः संभू
त इति पूर्वमुक्तं तत्र कीदृशः स इत्याकांक्षायामाह स वै राद्वै प्रसिद्धो निश्च
येवा एष पुरुषोऽन्नरसमयोऽन्नरसविकारः पुरुषाकृतिभावितं हि स
र्वांगेभ्यस्तेजः संभूतं रेतो बीजं तस्माद्यो जायते सोऽपि पुरुषाकृति १७
रेव स्यात् सर्वजातिषु जायमानानां जनकाकृतिनियमदर्शनात्

स हि पुरुष इह विद्ययान्तरं ब्रह्म संक्रामयितुमिष्टस्तस्य च बाह्याकारवि
शेषेष्वनात्मस्वात्मभाविता बुद्धिरनालंब्य कंचिद्विशेषं सहसांतरातम
प्रत्यगात्मविषया निरालंबा च न कर्तुमशक्येति दृष्टशरीरात्मसामान्य
संकल्पनया शाखाचंद्रदर्शनवदंतः प्रवेशयन्नाह इदं प्रसिद्धं शि
र एव शिरः ननु प्राणमयादिष्विव कल्पनामयं एवं पक्षादिषु योजना
अयं दक्षिणो बाहुर्दक्षिणः पक्षः अयं सव्यो बाहुरुत्तरः पक्षः अयं
मध्यमो देहभाग आत्मा अंगानां मध्यं ह्येषामात्मेति श्रुतेः इदमि
ति नाभेरधस्ताद्यदंगं तत्पुच्छमिव पुच्छं अधोलंबनसामान्यात् तदेव
प्रतितिष्ठत्यनयेति प्रतिष्ठा स्थितिसाधनं एतस्मादन्यो तरेषां प्राणम

यादीनां रूपकसिद्धिर्मूषानिषिक्तताम्राद्रिप्रतिमावत् अन्नमयादि
भ्य आनंदमयांतेभ्यः आत्मभ्यो ऽभ्यंतरतमं ब्रह्म विद्यया प्रत्यगात्मत्वे
न दिदर्शयिषु शास्त्रं अविद्याकृतपंचकोशापनयनेनानेकतुषको
द्रववितुषीकरणेन तंडुलानिव प्रस्तौति तस्मादिति तस्मादन्नरसमया
त्पिंडादन्यो व्यतिरिक्तोंऽतरो ऽभ्यंतर आत्मा प्राणमयः प्राणो वायुस्त
न्मयस्तेन प्राणमयेन एषोऽन्नरसमय आत्मा पूर्णः वायुनेव दृतिः स
वै एष प्राणमय आत्मा पुरुषविधः पुरुषाकार एव शिरः पक्षादिभिः किं
स्वतः तेत्याह प्रसिद्धं तावदन्नरसमयस्यात्मनः पुरुषविधत्वं तस्य पुरुष १८
विधत्वं अनुलक्ष्यीत्यायं प्राणमयोपि पुरुषविधः मूषानिषिक्तप्रतिमा

वत् एवं पूर्वस्य पुरुषविधतामनु उत्तरोत्तरः पूर्णः कथं विधः कथं पुनः पु
रुषविधतास्येत्यपेक्षायामुच्यते तस्य प्राणमयस्य वायुविकारस्य प्राणो
मुखनासिकानिःसरणवृत्तिविशेषः शिर इव कल्प्यते वचनात् सर्वत्र
वचनादेव पक्षादिकल्पना व्यानो व्यानवृत्तिर्दक्षिणपक्षः अपान उत्तरप
क्षः आकाश आकाशस्थो वायुः वृत्तिविशेषः समानाख्यो यः स आत्मेवा
त्मा प्राणवृत्त्यधिकारात् मध्यस्थत्वादितराः पर्यंतवृत्तीरपेक्ष्यात्मा म
ना ध्यं ह्येषामंगानामात्मेति हि प्रसिद्धं मध्यस्यात्मत्वं पृथिवीत्यदिन्यानिनी
देवता आध्यात्मिकस्य प्राणस्य [illegible] स्थितिहेतुत्वात् सैषा पुरुषस्या
पानमवष्टभ्यैलिप्यधःकृत्यांतरात् अन्यथोदानवृत्त्योर्ध्वगमनं गुरुत्वात्पतनं वा

स्याच्छरीरस्य तस्मात्पृथिवीपुच्छं प्रतिष्ठा तस्य पूर्वस्यान्नमयस्य एष शारीरोऽ
न्नमयेन वः शारीर आत्मकः य एष प्राणमय इति तस्माद्वा एतस्मादित्या
द्युक्तार्थमन्यत् अन्य इत्यादि मन इति संकल्पाद्यात्मकं अंतःकरणं त
न्मयो मनोमयः सोयं प्राणमयस्याभ्यंतर आत्मा यजुरिति अनियताक्ष
रपादावसानो मंत्रविशेषः तज्जातिवचनो यजुःशब्दस्तस्य शिरस्त्वं प्रा
धान्यात् प्राधान्यं हि यागादौ संनिपत्योपकारात् यजुषा हि हविर्दीयते
स्वाहाकारादिना वाचिनिकी वा शिर आदिकल्पना सर्वत्र एवं ऋक् ए
वसाम आदेशोत्र ब्राह्मणं आदेष्टव्यविशेषान्निर्दिशति अथर्वणांऽगि
रसा च दृष्टा मंत्रा ब्राह्मणं च शांतिपौष्टिकादि प्रतिष्ठाहेतुकर्मप्रधानत्वात्पु १९

छं प्रतिष्ठा तस्य पूर्वस्य प्राणमयस्य एष आत्मा शारीरः यः प्राणमये
न वः शारीरः कः य एष मनोमयः तस्माद्वा एतस्मादित्यादि पूर्ववत्
अन्य इत्यादि मनोमयो वेदात्मोक्तः वेदार्थविषया बुद्धिर्निश्चया
त्मिका विज्ञानं तच्चाध्यवसायलक्षणोंऽतःकरणस्य धर्मस्तन्मयः
निश्चयविज्ञानैः प्रमाणस्वरूपैर्निर्वर्तित आत्मा विज्ञानमयः प्रमा
णविज्ञानपूर्वको हि यज्ञादिस्तायते यज्ञादिहेतुत्वं च वक्ष्यति तद
पि श्लोको भवति विज्ञानं यज्ञं तनुते इत्यादि श्लोके न निश्चयविज्ञान
वतो हि कर्तव्येष्वर्थेषु पूर्वं श्रद्धोत्पद्यते सा सर्वकर्तव्यानां प्राथम्या
च्छिर इव शिरः ऋतं शास्त्रार्थनिश्चिता बुद्धिः सत्यं तदर्थानुभवप्रयत्नः

योगेयुक्तिःसमाधानं आत्मैवात्मा तदात्मनोहियुक्तस्यसमाधानंव
तोंगानीवश्रद्धादीनी तस्मा होग आत्माविज्ञानमयस्य महःपुछंप्र
तिष्टा महः महत्तत्वे प्रथमजं महद्यक्षं प्रथमजमितिश्रुतेन[illegible]
छंप्रतिष्ठाकारणत्वात् कारणंहिकार्य्याणांप्रतिष्ठा यथावृक्षवीरुधां
पृथिवी तथासर्वबुद्धिविज्ञानानांमहत्तत्वकारणं तेनतद्विज्ञानम
यात्मनप्रतिष्ठा तस्यपूर्वस्यमनोमयात्माएषशरीरेमनोमयेनवःशा स्या
रीरःकएषोविज्ञानमयः तस्माद्वाएतस्माद्युक्तार्थी अन्नमयादी
नांकार्यात्मनामधिकारात्मयट्प्रत्ययाच्च आनंदमयोपिकार्यात्म २०
वेदितव्यः आनंदस्यविकार आनंदमयः तस्यानंदमयस्यइ

ष्टपुत्रादिदर्शनजंप्रियं शिरइवशिरःप्राधान्यात् मोदइतिप्रियलाभनि
मित्तोहर्षः सएवचप्रकृष्टोहर्षःप्रमोदः आनंदःसुखसामान्यं आत्मैवा
त्माप्रियादीनांसुखावयवानां तेषुतस्यानुस्यूतत्वात् एवंचो--
मानस्यानंदमयस्यात्मनःविज्ञानापेक्षयाब्रह्मपुछंप्रतिष्टा यत्र
ठतंसत्यज्ञानानंदलक्षणंयस्यज्ञानानंदलक्षणेप्रतिपत्त्यर्थंपंचान्ना
दिमयाः कोशाउपन्यस्ताःयच्चतेभ्योभ्यंतरंयेनचतेसर्वे आत्मवंतस्त
द्ब्रह्मपुछंप्रतिष्ठा तदेवसर्वस्याविद्यापरिकल्पितस्यद्वैतस्यावसानभू
तमद्वैतंयतइति ।।५।। उदरमिति उदरंब्रह्मवैश्वानरभूतेनब्रह्म
णाधिष्ठितत्वात् शर्कराक्षस्यापत्यानिशार्कराक्षाऋषयःउपासते

चिंतयंति हृदयपुटरादूर्ध्वप्रदेशंपुंडरीकाख्यं ब्रह्मणउपलब्धिस्थान
त्वाद्ब्रह्मेत्युपासते के अरुणस्यापत्यानि आरुणयः ब्रह्माहैवेति ब्रह्मा
हवएवेति पदच्छेदः तत्रब्रह्माब्रह्मणीत्यर्थः हशब्दोऽनर्थकोनि[illegible]
तः ताईत्यत्र शब्दोपितथा ताते इत्यर्थः ब्रह्मानाडीत्यन्यत्र ईस्थाने
जादेशश्छांदसः तदस्यासीतिब्रह्मणीएवेत्यर्थः पुनरपिऊर्ध्वत्वेचो
दसर्पत्तद्धृत्कऊर्ध्वमुत्क्राम्यशिरोऽप्ययत् आश्रिलग्यत् विशेषेणाशि
रसिहितवद्भिः श्रोत्रादीनिकरणानिस्वस्वस्थानेषुपृथङ्निक्षिप्यद
र्शनश्रवणादिव्यापारंकुर्वंदास्ते इत्यर्थः शतंचैकाचएकोत्तरशततना २१
ड्यः हृदयस्यमांसपिंडस्यसंबंधिन्यः प्रधानतोभवंति आनेत्यादेह

नाडीनांविष्वक् नानागतयस्तिर्यग्विसर्पिण्यऊर्ध्वगाअन्यानाड्योभ
वंतिसंसारगमनद्वारभूताः स्पष्टमन्यत् १८ ५ स्वकतेति एकइ
ति मूर्तित्रयात्मकनानाभेदंवारयति एकइति जाड्यमाशंक्याह
देवइति आदित्यवत्द्योतनात्मकः ताटस्थ्यंनिराकरोति सर्वभू
तेष्विति किंभिन्नितर्हिसर्वैर्नोपलभ्यतेतत्राह गूढइति बुद्ध्यादिव
त्परिच्छिन्नत्वंव्यवच्छिनत्ति सर्वव्यापीति तर्हिनोवदनात्मत्वंस्यादि
त्याह सर्वभूतांतरात्मेति तर्हितत्तत्कर्मफलसंबंधित्वंस्या[illegible]त्या
ह कर्माध्यक्षइति सर्वाधिष्ठानत्वमाह सर्वभूताधिवासः सर्वभू
तेषुसत्तास्फूर्तिप्रदत्वेनसंनिधिर्वा अत्रोच्यते नकेवलंकर्मणामेवा

ध्यक्षोऽपि तु न द्रष्टृत्वमपीत्याह साक्षीति दर्शनकर्तृत्वशंकां वारयति
चेता इति अद्वितीयत्वं चाह केवल इति धर्माधर्मादिराहित्यं चाह नि
र्गुण इति किं बहुना निःशेषविशेषशून्य इत्यनुक्तसमुच्चयार्थश्चकारः
टीकायां स्वस्वतायोनीरनुकरोतीत्यर्थकथनमेतत् विसृतविग्रहस्तु
स्वस्वतासु योनिषु अनुकृतिरनुकरणं यस्य स तथा १६ ६ स्वस्वतपुरे
ष्विति स यश्चायमिति गुहायां निहितः परमे व्योम्नि आकाशादि अ
न्नमयान्तं कार्यं सृष्ट्वा तदेवानुप्रविष्टः स य इति निर्दिश्यते कोऽसाव
यं पुरुष इत्यपेक्षायामुच्यते यः पूर आनंदः श्रोत्रप्रत्यक्षो निर्दिष्टो २२
यस्यैकदेशं ब्रह्मादीनि भूतानि सुखाहीर्णि उपयंति स एवायं यश्चा

सावादित्य इति निर्दिश्यते स एकः भिन्नप्रदेशस्थ घटाकाशाकाशैकत्व
वत् तत्त्वमसीति बुद्धीद्रियेत्यत्र व्याख्यातं यस्य देव इति एते अस्योप
पनिषदि भगवता श्वेताश्वेतरेण कथिता उपदिष्टा अर्थाः पदार्थाः प्र
काशंते यथावत्स्फुरंति महात्मनो महानुभावस्य नान्यस्येति हि य
स्मात् तस्माद्ब्रह्मविद्यार्थिभिर्देवता गुरुविषया निरुपाधि भक्तिः कर्त
व्या इत्यभिप्रायः स्पष्टमन्यत् टीकायां तौ स्वतावतारस्येति अत्तरश्लो
कान् प्रायेण स्वतावतारस्य शास्त्रप्रसिद्धस्येत्यर्थः २० ७ इत्यागमे
ति यमिति यं प्राग्युक्तविशेषणं भूसनृसिंहव्यूहं सर्वे पृथिव्यंतरिक्ष
नाकब्रह्मलोकनिवासिनो महाचक्रोपासकाश्चेति द्विधा उपासकाए

यदेवाः सर्वेसिसृक्षव विजिगिषुत्वान्मोदशालित्वात् तेषामेवद्विविधो
पासकानांविशेषणद्वयमाह मुमुक्षवोब्रह्मवादिनश्चेति ब्रह्मवा
दिनोब्रह्मवदनशीलामुक्ता इत्यर्थः शीलार्थकणिनिप्रत्ययोगात्
व्याख्यातंचेति नृसिंहतापनीयोत्तिद्वितीयोपनिषदीनाष्यकृद्भिः
श्रीमच्छंकराचार्यैरपीतिचशब्दव्याख्यानंभाष्येपीति नमंतियस्य
भजंतइति २९ ८ त्वदनुपथमिति आराममिति आराममारा
मणंग्रामं सं नगरंस्त्रियमन्नाद्यमित्यादिवासनारूपमाक्रीड
नंअस्यात्मनः अनेननिर्मितमित्यर्थः तमात्मानंअत्यंतविविक्तं द २३
ष्टिगोचमापन्नमपिकश्चनकश्चिदपिनपश्यति अहोभाग्यहीनताजो

कस्येतिलोकंप्रतिअनुक्रोशंदर्शयतिश्रुतिः नतमिति तंयूयंनविदा
थनजानीथ यस्मादिमानिभूतानिजज्ञानजनयति अतोयुष्माकं
तस्यचपुरुषस्यान्यत्रहृदंतरं पुरुषोजनकोयूयंजन्याः यदितुज्ञा
त्वाआत्मनत्वंसत्येभनोपास्यथतदानंसंस्तुतिःस्यादित्याभिप्रायः ए
वंप्रत्यक्षमुक्त्वापरोक्षमभिनयेनदर्शयन्नाह येचैतेनीहारेणाविध
याप्रावृताः अवगुंठिताः येचजल्प्याजल्पप्रवृत्ताः प्रत्यक्षहेतुवादष्टां
तैरात्मज्ञानजल्पैःप्रवृत्तास्तार्किकाइत्यर्थः येचासुतृपः तेषांनदे
वांतरंबभूव येचउक्थशासनः उक्थानांशासितारः यज्ञानसंपुरु
षंप्रतिचरंतिविचरंतिसंसरंतिइत्यर्थः पुरुषद्विदस्तुपुरुषाएनवंति

नीहारप्रवृनाल्लुतरकथायिनत्वितिशेषः २२ ९ निच्छतइति आत्मा
वाइति यस्मादात्मप्रीतिरिमुभवत्यात्मौणी अन्यत्रप्रीतिरात्मनितु
मुख्यातस्मादात्मावाअरेद्रष्टव्यइत्यादि वैइति अनर्थकोनिपातो
नः अरेमैत्रेयिद्रष्टव्योदर्शनविषयमापादयितव्यः कथंश्रोतव्यः
पूर्वमाचार्यतः आगमतश्च पश्चान्मन्तव्यस्तर्कतः ततोनिदध्या
सितव्यः निश्चयेनध्यातव्यः एवंह्यसौद्रष्टोभवति २३.१० रुद्र
हइति यतोवाचइति आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चने
तिमंत्रशेषः यतोयस्मान्निर्विकल्पात् यथोक्तलक्षणादद्वयानं २४
दादात्मनोवाचोऽभिधानानि द्रव्यादिसविकल्पवस्तुविषयाण्य

वसामान्यानिर्विकल्पेऽद्वयेपिब्रह्मणिप्रयोक्तृभिः प्रकाशनायप्रयुज्यमा
ना अप्राप्याप्रकाश्यैवनिवर्त्तंते स्वसामर्थ्याद्धीयंते मनइतिप्रत्ययोवि
ज्ञानंतच्चयत्राभिधानंप्रवृत्तंतत्रप्रवर्त्तते प्रकाशनाय यत्रचविज्ञानं
तत्रवाक्प्रवृत्तिः यस्मात्सहैववाङ्मनसोरभिधानप्रत्यययोः प्रवृत्तिः
सर्वत्रः तस्मात्ब्रह्मप्रकाशनायसर्वथाप्रयोक्तृभिः प्रयुज्यमाना अपि
वाचोयस्मादप्रत्यविषयात्सहैवमनसाविज्ञानेननिवर्त्तंते तद्ब्रह्मणः
आनंदंविद्वान्जानन्तकुतश्चननिमित्तान्नबिभेति निमित्ताभावा
त् परमात्मनोह्युद्वैयत्वेऽन्यन्नरंतद्याहरति कोऽद्वेति तस्मिन्प्र
वत्कापिसंसारसंगस्तेनास्तीत्याह कइहेति प्रवोचत् प्रवोचदित्य

र्थः जगतः सृष्टिकर्तृत्वेन परस्य हेयत्वमाशंक्य कुत्र स्थाने तत्तेन सृष्टिर्जाता इत्या
ह कुत आयातेति नहि इयं विविधा सृष्टिः अन्यस्मादुपपद्यते अन्यस्य वस्तुनो
अभावादित्याह कुत इयं विसृष्टिरिति ननु हिरण्यगर्भः समवर्त्तताग्रे इ
त्यादिश्रुतिसिद्धहिरण्यगर्भादेः सकाशात् सृष्टिरुत्पद्यते तत्राह अर्वागि
ति योब्रह्माणं विदधाति पूर्वमित्यादिश्रुतेः अथ इत्यर्थे अथो शब्दः ननु पर
स्मादन्यस्माच्च सृष्टा संभवेत् कथं अस्याः स्फूर्त्तिस्तत्राह को वेदेति अनिर्वचनी
यैव सृष्टिप्रतीतिरित्यर्थः पूर्वमात्मानं घ्नीतीति आत्महन इत्युक्तं तत्की
दृशमात्मतत्त्वमित्युच्यते अनेजत् एजनं स्वावस्थानात्प्रच्युतिस्तद्वर्जितं २५
एकं सर्वदा एकस्वरूपमित्यर्थः कुत्र सर्वभूतेषु मनसः संकल्पलक्षणात्

जवत्तरं कथमेतन्न हि रुद्धमुच्यते इति चेत् सोपाधिकनिरुपाधिकाभ्यामिति
ब्रूमः उपाधिश्च मनस्तदनुवर्त्तनात् जवीयस्त्वं च प्रसिद्धमेव इह देहस्थस्य म
नसो ब्रह्मलोकादिदूरसंकल्पनं क्षणमात्रादिति मनसि च ब्रह्मलोकादीन्
द्रुतं गच्छति सति प्रथमप्राप्त इव आत्मा चैतन्याभासत्वेन गृह्यते अतो मन
सोपि जवीय इति एतदात्मतत्त्वं देवा द्योतनात्मकत्वाच्चक्षुरादीनि इंद्रिया
णि नाप्नुवन् तत्र हेतुः यस्मात् मनसोपि पूर्वमर्षत् पूर्वमेव गतं व्योमव
द्व्यापित्वात् तदात्मतत्त्वं तिष्ठत् स्थिरमपि धावतो द्रुतं गच्छतोऽन्यानात्म
विलक्षणान् वागिंद्रियादीन् अत्येति अतीत्य गच्छतीव तिष्ठदित्यनेन
इवार्थता प्रतीतेः अस्मिन्नात्मतत्त्वे सति नित्यचैतन्यस्वभावो मातरिश्व

तरिक्षेऽश्वयन्तीतिमातरिश्वावायुः सर्वप्राणभृत्क्रियात्मको यदाश्रयाणि का
र्यकारणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो
विधायित्वं समातरिश्वा अपः प्राणिनां चेष्टालक्षणानि कर्माणि दधा
ति धारयति संपादयतीत्यर्थः २४ ११ जनिमसत्त्विति एकविंशतीति
षडिंद्रियाणि षड्बुद्धयः षड्विषयाः सुखं दुःखं शारीरं चेति सदेवेति सदि
त्यस्तितामात्रं वस्तु सूक्ष्मं निर्विशेषं सर्वगतं एकं निरंजनं नित्यं निरव २
यवं विज्ञानं यदवगम्यते वेदांतेभ्यः तदेकमात्रं तत्तादात्म्यापन्नमि
त्यर्थः इदं नामरूपविकृतं जगत् हे सौम्य साधो श्वेतकेतो अग्रे जग २६
दुत्पत्तेः प्राक् आसीत् बभूव अनेनासद्वादः परिहृतः ब्रह्मैवेति यो हि

सुप्तावस्थमिव निर्विशेषं अद्वैतं असुप्तचिद्रूपं ज्योतिः स्वभावं आत्मानं पश्य
ति स पद्यतपि देहवानिव लक्ष्यते तथापि इहैव ब्रह्मैव सन् शरीरपातोत्तर
कालं ब्रह्माप्येति अनेन असतो ब्रह्मत्वस्योत्पत्तिसत्ते एकविंशतिविधदुःख
स्य निवृत्त्यात्मको मोक्ष इति पक्षद्वयं परिहृतं आद्य ब्रह्मैव सन्नित्यनेनाज्ञा
नरूपावरणभंगमात्रस्य स्वीकारात् द्वितीय ब्रह्माप्येति इत्यनेन मोक्षस्य
स्वभावरूपतांगीकारात् मीमांसकमतं परिहरति अनीशयेति अनीशा
मायातया शोचति संतप्यते मुह्यमानोऽनेकैरनर्थप्रकारैरविवेकवत्तीचिं
तामापद्यमान इति शोकमोहादेः कर्मफलत्वेन सत्यत्वानुपपत्तेः किं र तस्य
अविद्यायामंतरे मध्ये वर्तमाना अविवेकप्रायाः स्वयं वयमेव धीरा धीमं

नः पंडिताइतिमन्यमानाः जरारोगाद्यनेकानर्थव्रातैर्हन्यमानाः परियंतित्रमं
ति अंधेनैवाचक्षुषेवनीयमानाः प्रदर्शमानमार्गाः अंधाश्चक्षुरहितायथा
लोकेकंटकादौपतंतितद्वदितिकर्मफलनिंदैवेतिभावः इदानीनानात्मप
क्षंपरिहरति एकमेवेति एकंमितिसजातीयंचेतनंरवस्त्वंतरं अद्वितीयं
मितिविजातीयंअचेतनंद्रव्यांतरं एवकारेणस्वगतंगुणादिकंचप्रति
षिध्यते नन्वेकस्यकथमनेकत्वप्रतीतिभासइत्यतआह एकधेति एक
एवहिभूतात्माभूतेभूतेव्यवस्थितः एकधाबहु [illegible]
दितिसकलाकृतिः एक [illegible] विजातीयस्वगतभ २७
दभून्यः [illegible] वैभुव्यवस्थितःत्रिविध व्यवस्थितः अवस्थानंप्राप्तः एक

धाख्यप्रकाशचिद [illegible] बहुधाचानेकशरीरादिप्रकारेण एकधेत्यनेन
एवकारस्तुसंबध्यते एकधैव [illegible] बहुधापिदृश्य [illegible] योजना यद्वा एव
इवार्थे उपाधेरेकत्वेन एकधेवबहुत्वेनबहुधाइव [illegible] इति [illegible]
यं तत्रदृष्टांतमाह यथाबहुयोजनव्यापकेजलह्रदेप्रतिबिंबितश्चंद्रएक
धादृश्यतेशरावादिषुप्रतिबिंबितस्तुबहुधेतितद्वत् एतावतासांख्यादिम
तेस्पष्टमेवनिराकृतं २५ १२ सदिवमनइति असतइति असतोऽव्या
कृतात् अधि अधिकंसमष्टिरूपंमनोऽसृज्यत कर्मकर्तर्ययंप्रयोगः
अनायासेनसृज्यमानत्वात्स्वयमभूदित्यर्थः यद्वा असद्वाइदमग्रआ
सीदितिश्रुतेरसतोब्रह्मणोनिमित्ताद्विद्यतेधीर्यस्मादित्यधिअज्ञान

मेवात्मव्यतमनोरूपेणाविवर्त्तितमनूतइत्यर्थः अतात्विकोऽन्यथाभा
वोविवर्त्तः अत्रापंचीकृतपंचमहाभूतात्मकंहैरण्यगर्भंतत्वेमनःप्रधा
नमसमष्टिलिंगशरीरोपाधित्वात्मनइत्युच्यते तच्चमनःप्रजापतिर्बृह
शरीरोपाधिविराजंवैश्वानरनामधेयंअसृजत तत्रयत्रापिआत्मनेप
दंष्ठांरसं तस्माद्यदिदंपरिदृश्यमानं किंचकिंचन तदिदंमनएवम
नोनावापन्नेअव्याहतेएव परमंयथास्यात्तथाप्रतितिष्ठंप्रकर्षेणस्थि
तमित्यर्थः २६ १३ नवेति सत्यंज्ञानमिति बुद्धौ [illegible] तत्सत्यं ने
हनानास्तिकिंचनेत्यस्मात्पूर्वंमनसैवानुद्रष्टव्यंनेहनानास्तिकिंचनेति २९
मनसैवपरमार्थज्ञानसंस्कृतेनमनसैवनतुचक्षुरादिना अनुनिरंत

रं द्रष्टव्यंदर्शनविषयंकर्त्तव्यं नइहदर्शनविषयेब्रह्मणिनानास्तिकिंचन
किंचिदपि मृत्योरिति असतिनानात्वेनानात्वमध्यारोपयति अविद्यया
स मरणात्मरणंप्राप्नोति कोसौयइहनानेवपश्यति अविद्यारोपणव्यति
रेकेणनास्तिपरमार्थतोद्वितीयमित्यर्थः तस्यवागिति तस्यप्राणरूपये
श्वररूपस्यविभूत्यभिधित्सयाइदंआरभ्यते तस्यप्राणमयस्यवागीन्द्रि
यमेवतंतिरिवतंतिः रज्जुः तत्संयुक्तानिनामानि अभिधानानि दामानीति
दामानी तदिदंजगदभिधेयभूतं अस्यप्राणस्यवाचातंत्यानामभिर्दा
मस्थानीयैःसर्वमशेषं सितंबद्धं अभिधेयस्याभिधानंप्रकाशयतीति
नावः देहांतइति यइहस्थातुमपेक्षतेसर्वैश्वर्यंददाति देहांतेदेवःश्रीर

सिंहः परब्रह्मतारकं व्याचष्टे कामिनं प्रत्यन्यदेहानां विशेषणोपादानात्का
मित्वेन त्यागानधिकाराच्च निष्कामस्यापि गृहिदेवः परंब्रह्मतारकं प्रवक्ष्य
सामांगप्रणवेन व्याख्यातं कथयति येन प्रणवेन व्याख्यातेनामृती भूत्वा
सश्रोताऽमृतत्वं कैवल्यं च प्राप्नोति॥ यमिति पूर्वेणान्वयः आत्मा प्रवचनेन ल
भ्यो न मेधया न बहुना श्रुतेनेत्युक्तं इदानीं केन तर्हि लभ्यत इत्याकांक्षा
यामिदमुच्यते यमेव परमात्मानं एष विद्वान्वृणुते प्राप्तुमिच्छति तेन वरणेनै
वैष परमात्मा लभ्यो न साधनांतरेण तस्यात्मनित्यलभ्यस्य लाभत्वात्
यद्वा यमेव विद्वांसं एष परमात्मा वृणुते प्राप्तुमिच्छति आत्मसात्कर्तुं वा २९
च्छतीत्यर्थः तेनैष इत्यादि पूर्ववत् यस्य देव इति स्वक्षतपुरेषित्यत्र व्या

ख्याते २७ २८ त्वमिति प्रपाणीति निर्विशेषत्वात्पाणिपादमस्य न विद्य
ते तथापि जवनो ग्रहीता च ज्ञाताज्ञानसाक्षित्वेन तत्र तत्र गच्छतीव जवना
नीति जवनः ईश्वरसत्ताव्यतिरेकेण सर्वस्य सत्ताभावात्सा विद्याकस्मि
तस्य सत्ताप्रदत्वेन स्थानेदेनग्राहकत्वाद्ग्रहीता च पश्यत्यचक्षुः स्वयं च
क्षुः शून्योपि चक्षुस्तद्वृत्तिं तद्विषयान्स्वरूपानुभवेन पश्यति एवं स शृणो
त्यकर्ण इत्येतद्व्याख्येयं इतरेंद्रियाणामप्युपलक्षणमेतत् किंबहुना
स परमात्मा वेदनार्हं जडं तद्विशेषरूपं सर्वं स्वसंनिधिमात्रेण जानाति स्याह नि
कत्वेन प्रसिद्धानां चक्षुरादीनामपि ग्राहक ईश्वरश्चेत्तस्याप्यन्यस्तस्य चा
न्य इत्यनवस्था स्यादित्याशंक्याह नचेति तस्य वेत्ता नास्ति दृश्यत्वेन जडा

नांचक्षुरादीनांग्राहकसापेक्षत्वं स्वप्रकाशचिदेकरसस्यसाक्षिणई
श्वरस्यग्राहकांतरानपेक्षेतिभावः जीवेति जीवानीत्यांवातीवावायुःप
कजीवानीत्यर्थः अस्यामृचियद्यपिपंचानामेवैषांग्रहणंतथापितदादि
त्वेन्यायेनसर्वेषांब्रह्मादीनामपिग्रहणंबोध्यं २९ १५ स्थिरचरजातय
इति आत्मातिरिक्तंवस्त्वंतरंनास्तीत्युक्तं तत्रदृष्टांतः यथेति यथाचक
रूपादेकस्मादग्नेः क्षुद्राः अल्पप्रमाणाःविस्फुलिंगाअग्निकणाविवि
धंनानाव्युच्चरंतिनुत्तिष्ठंति २ अयंदृष्टांतः कारकत्वेदार्ष्टांतिकेप्रत्य
त्तिंदर्शयति प्राकृतप्रवृत्तेरस्यनावनएकत्वं एवमस्मादात्मनः विज्ञा ३०
नमयस्यप्राकृतप्रतिबोधात्यस्वरूपंतस्मादित्यर्थः प्राणाइंद्रियाणि

लोकाःकर्मफलानिदेवाइंद्रियाणांलोकानांचाधिष्ठातारोऽग्न्यादयःभूतानि
ब्रह्मादिस्थावरांतानि आत्मनउपाधिसंपर्कजनितविशेषप्रतिबुध्यात्मा
नात्मनइति जात्याल्लिंगिनाइति जातिसंस्कारेणेत्यर्थः ईश्वरैवेति सि
सृक्षात्मिकयेत्यर्थः असद्वेति असदितिव्याकृतंनामरूपविपरीतंअ
विकृतंब्रह्मोच्यतेनपुनरत्यंतमेवासत् नह्यसतःसज्जन्मास्ति इदमिना
मरूपविशेषवदव्याकृतंजगत् अग्रेपूर्वंब्रह्मैवयच्छब्दवाच्यमासीत्ततो
ततोवैसंप्रविभक्तनामरूपविशेषंजगदजायतोत्पन्नं आदिशब्देनतदात्मा
नंस्वयमकुरुतेत्यादिग्रहणं २९ १६ अपरिमिताइति संसरंतोजं
तीन्कमित्यत्रसंसारनाशायेत्येतदाकांक्षान्यत्वान्नलिखितमिति

बोध्यं एकैकांशस्य बंधमोक्षौ स्थापयित्वा सर्वांशेषनिर्मोक्ष इति प्रसंगस्य सिद्धांत
माह ईश्वरस्येति समष्ट्युपाधेरखंडतत्त्वस्येश्वरत्वात् तस्य च विद्याशक्ति
प्रधानत्वादिति भावः यस्यामतमिति यस्य ब्रह्मवि[…] मतमविज्ञातं अ
विदितं ब्रह्मेति मतं अभिप्रायो निश्चयस्तस्य मतं ज्ञानं यस्य पुनर्मतं ज्ञातं वि
दितं सम्यग्ब्रह्मेति अभिप्रायो निश्चयो न वेद वेद सः अत एवाविज्ञातमत
मविदितमेव ब्रह्म विजानतां सम्यग्विज्ञानवतामित्यर्थः अवचनेनेति वेदा
न् शास्त्रमधीत्य गुरुकुलादागतं तनयं पिता पृष्टवान् अप्यब्रह्मत्वं ज्ञा
तवानसीति तस्योत्तरं अवचनेनेति अविशेषे प्रत्यग्ब्रह्मणि शब्दप्र ३१
वृत्तिहेतुजातिगुणादेरभावात् ब्रह्मवित्प्रश्नो तम्मूकमुखकांत्यादिना

तदभिनयं कृत्वा अवचनेन प्रोवाच प्रत्यग्ब्रह्म मयानुभूतमिति सूचितवा
नित्यर्थः सपितामह प्रसिद्धो तूष्णीं बभूव ब्रह्मात्मतत्त्वमयं ज्ञातवानिति नि
श्चयं जगामेत्यर्थः यदीति यदि कदाचिन्मन्यसे सुवेदेति सुष्ठु वेदाहं ब्रह्मे
ति दभ्रमल्पमेवापि नूनं त्वं वेत्थ जानीषे यदस्य ब्रह्मणो रूपमिति पूर्वेणैव
संबंधः न केवलं अध्यात्मोपाधिपरिच्छिन्नस्यास्य ब्रह्मणो रूपमल्पं वेत्थ
यदप्यधिदैवतोपाधिपरिच्छिन्नस्यास्य ब्रह्मणो रूपं देवेषु तदपि त्वं दभ्र
मल्पमेव न विन्देति मन्ये हं यत्तु निरूपाधि भूमाख्यं ब्रह्म न तत्सुवेद्यमिति - न्य
भाष्यः ३०·२७ नघटत इति उपाधिजन्मनैवेत्यत्र उपाधिजन्मनोप्य
नादिप्रवाहो बोध्यः अन्यथा दोशषस्य नादवस्थात् अजामेकामिति

नजायत इत्यजा मूलप्रकृतित्वात् तेजोऽबन्नानि लोहितशुक्लकृष्णानि वर्णा
निस्पृष्ट्वा तत्रूपत्वा लोहितशुक्लकृष्णां रज आध्यात्मिकत्वाद्वा सरूपां रज
आध्यात्मिकां अजोजन्मादिरहितः एकः क्षेत्रज्ञः हि यस्मात्क्लेशादिवि
षयत्वापन्नां प्रकृतिं जुषमाणः सेवमानः अनोऽनुसेते निरंतरं मुह्य
ति जहात्येनां जहाति नाशयति अधर्मं त्यजतीतिवत् सम्यग्ज्ञानेन चि
न्मात्रतया बाधत इत्यर्थः कथंभूतानां एनां भुक्तभोगां भुक्तः संसारभो
गो यया सा तां अन्यं परमात्मा परस्पराध्यस्तमिति अविद्यारोपितं तेन
कारणोपाधिना जीवेन का[illegible]धिपेन वाजायते इत्येतद्वायाति तर ३२
स्मादिति आकाशाद्वायुर्वायोर[illegible]ग्नेरापः अद्भ्यः पृथिवी पृथिव्या[illegible]